सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।

कल्पक्शये पुनस्तानि कल्पादौ विसृजाम्यहम्॥ ९.७ ॥

sarvabhūtāni kaunteya prakṛtiṁ yānti māmikām |
kalpakśaye punastāni kalpādau visṛjāmyaham || 9.7||

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।

भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥ ९.८ ॥

prakṛtiṁ svāmavaṣṭabhya visṛjāmi punaḥ punaḥ |
bhūtagrāmamimaṁ kṛtsnamavaśaṁ prakṛtervaśāt || 9.8||

न च मां तानि कर्माणि निबध्नन्ति धनंजय।

उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९.९ ॥

na ca māṁ tāni karmāṇi nibadhnanti dhanañjaya |
udāsīnavadāsīnamasaktaṁ teṣu karmasu || 9.9||

मयाध्यक्शेण प्रकृतिः सूयते सचराचरम्।

हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ ९.१० ॥

mayādhyakśeṇa prakṛtiḥ sūyate sacarācaram |
hetunānena kaunteya jagadviparivartate || 9.10||